# अध्यायः – 9



## विपण्याम् एकं युतकम्

अयम् अध्यायः अस्मान् एकस्य युतकस्य कथां बोधयति। इयं कथा कार्पासस्य उत्पादनात् आरभते तथा च युतके विक्रीते सति समाप्तिं गच्छति। आगच्छन्तु वयं पश्यामः यत् विपणीनां शृङ्खला कर्पासस्य उत्पादकान् विशिष्ट-विपण्यां युतक-ग्राहकेन सह कथं योजयति। एतस्यां शृङ्खलायां प्रत्येकं शृङ्खलया सह क्रयणं विक्रयणं च सम्बद्धम् अस्ति। किम् एतस्मात् सर्वेषां कृते समानरूपेण लाभः भवति ? अथवा अपरेषां कृते अन्येषाम् अपेक्षया आधिक्येन लाभः जायते ? वयम् एतद् ज्ञातुं प्रयत्नं करिष्यामः।

## कुरनूले कार्पासोत्पादकस्य काचित् महिलाकृषिका

स्वप्ना-महोदया या कुरनूलस्य आन्ध्रप्रदेशस्य काचित् लघुकृषिका अस्ति सा स्वस्य लघुक्षेत्रे कार्पासं वपति । कार्पासस्य पादपेषु आगतबीजानि पक्वभावं गच्छन्ति तथा च तेषु केचन प्रस्फुटिताः अपि सन्ति अतः स्वप्ना कार्पासस्य चयने व्यस्ता अस्ति । कार्पासस्य बीजकोशे यस्मिन् कार्पासं पूर्णरूपेण पूरितम् अस्ति सह एव न प्रस्फुटन्ति । अतः कार्पासम् एकत्रीकर्तुं बहूनि दिनानि व्यतीतानि भवन्ति।

*किं स्वप्ना कार्पासस्य उचितं मूल्यं प्राप्तवती?*

*व्यापारी स्वप्नायै न्यूनं मूल्यं किमर्थं दत्तवान्?*

*भवतां विचारेण महान्तः कृषकाः स्वकार्पासं कुत्र विक्रेष्यन्ति? तेषां स्थितिः स्वप्नायाः स्थितेः केन प्रकारेण भिन्ना अस्ति?*

कार्पासम् एकत्रीकृत्य स्वप्ना तत् स्वपतिना सह कुरनूलस्य कार्पास-विपणिम् अनीत्वा कस्यचित् स्थानीय-व्यापारिणः समीपं नयति । सस्यस्य वपनस्य समये प्रारम्भिके काले एव स्वप्ना व्यापारिणः कृष्यर्थं बीजानि उर्वरकान् कीटनाशकादीन् च क्रेतुम् उच्चकुसीदमात्रा इत्यनेन पञ्चविंशति-शतं रूप्यकाणि स्वीकृतवती आसीत् । तस्मिन् समये स्थानीय-व्यापारी स्वप्नां एकस्याः प्रतिभूत्याः कृते सहमतां कृतवान् आसीत् । सा स्वप्नया वचनबद्धताम् अथवा प्रतिज्ञां कारितवान् आसीत् यत् सा स्वस्य सम्पूर्णं कार्पासं तम् एव विक्रेष्यति।

कार्पासस्य कृषौ अधिकतमस्य निवेशस्य आवश्यकता भवति यथा उर्वरकाणां कीटनाशकादीनां च । एतेषु कृषकैः महान् व्ययः करणीयः भवति । प्रायेण लघुकृषकैः एतेषां व्ययानां पूर्त्यर्थं रूप्यकाणि ऋणरूपेण स्वीकरणीयानि भवन्ति।

व्यापारिणः परिसरे तस्य द्वौ कर्मकरौ कार्पासस्य गोणीः तोलयन्ति स्म। 1500 रूप्यकाणि प्रतिक्विंटल इत्यस्य अनुसारं कार्पासस्य सम्पूर्णं धनं 6000 रूप्यकाणि इति जातानि। व्यापारी प्रदत्तस्य ऋणस्य तथा कुसीदस्य रूपेण 3000 रूप्यकाणि स्वीकृतवान् अपि च स्वप्नायै अधुना केवलं 3000 रूप्यकाणि एव दत्तवान्।

स्वप्ना – केवलं 3000 रूप्यकाणि।

व्यापारी – कार्पासम् अधुना अल्पमूल्येन विक्रीयते। विपण्यां व्यापकमात्रया कार्पासं प्राप्तम् अस्ति।

स्वप्ना – एतस्य कार्पासस्य उत्पादनार्थं, मया मासचतुष्टयं यावत् कठिनः श्रमः कृतः अस्ति । भवान् पश्यतु इदानीं कार्पासं कियत् शुद्धं स्वच्छं च वर्तते । अस्मिन् प्रक्रमे अहम् आशावती आसम् यत् उत्तमं मूल्यम् अहं प्राप्स्यामि।



***व्यापारी - अम्ब! अहं भवत्यै उत्तमं मूल्यं यच्छामि । अन्ये व्यापारिणः एतावद् अपि न दास्यन्ति। भवत्याः मयि विश्वासः न स्यात् तर्हि कुरनूलस्य विपणिं गत्वा जानन्तु ।***

***स्वप्ना - रुष्टः मा भव। अहं कथं भवति सन्देहं कर्तुं शक्नोमि ? अहं तु केवलम् आशां कृतवती आसम्, यत् अस्मिन् प्रक्रमे कार्पासस्य सस्ये एतावान् आयः भविष्यति येन केषाञ्चित् मासानां निर्वहणं सम्यक्तया भविष्यति इति ।***

***यद्यपि स्वप्ना जानाति यत् कार्पासः न्यूनातिन्यूनं 1800 रूप्यकाणि प्रतिक्विंटल इति विक्रेष्यते परन्तु सा अग्रे विवादं न करोति। व्यापारी ग्रामस्य कश्चित् शक्तिशाली जनः अस्ति तथा च कृषकैः ऋणार्थं तस्य आश्रितैः भाव्यं न केवलं कृषेः कृते अपितु अन्यासाम् आवश्यकतानां कृते अपि यथा रोगनिवारणार्थं बालानां विद्यालयस्य शुल्कादीनां च कृते। पुनः वर्षे एतादृशः समयः अपि आगच्छति यदा कृषकाणां पार्श्वे किञ्चित् अपि कार्यं न भवति कार्याभावे आयः अपि तेषां न भवति तस्मिन् काले ते केवलं ऋणं स्वीकृत्य एव जीवितुं शक्नुवन्ति ।***

***कार्पासस्य उत्पादनं कृत्वा अपि स्वप्नायाः आयः केवलं तस्मात् आयतः केवलं किञ्चित् एव अधिकम् अस्ति यः आयः श्रमं कृत्वा प्राप्तुं शक्यते ।***

***इरोडस्य वस्त्र-विपणिः***

तमिलनाडु-राज्ये सप्ताहे वारद्वयं जायमाना इरोडस्य वस्त्र-विपणिः संसारस्य विशालतमेषु विपणिषु काचित् अस्ति । एतस्यां विपण्यां अनेकप्रकारं वस्त्रं विक्रीयते । पार्श्वस्थेषु ग्रामेषु तन्तुवायैः वयितं वस्त्रम् अपि एतस्यां विपण्यां विक्रयणार्थम् आनीयते । विपणेः पार्श्वे एव व्यापारिणां कार्यालयाः सन्ति ये एतत् वस्त्रं क्रीणन्ति। दक्षिणभारतस्य अन्ये व्यापारिणः अपि एतस्यां विपण्यां वस्त्राणि क्रेतुम् आगच्छन्ति ।

विपण्याः दिनेषु ते तन्तुवायाः अपि भवतः मेलिष्यन्ति ये तन्तुवायाः व्यापारिणाम् आदेशानुसारं वस्त्रं निर्माय अत्र आनयन्ति। एते व्यापारिणः देशस्य विदेशस्य वा वस्त्रनिर्मातॄणां निर्यातकानां च कृते तेषाम् आदेशानुसारं वस्त्रस्य उपलब्धतां कारयन्ति । एते सूतं क्रीणन्ति तथा च तन्तुवायान् निर्दिशन्ति यत् कीदृशं वस्त्रं सज्जीकरणीयम् इति। निम्नलिखिते उदाहरणे वयं द्रक्ष्यामः यत् इदं कार्यं कथं भवति ।



इरोडनामके स्थाने कश्चन आपणः





*१. विपण्यां कस्यचित् व्यापारिणः आपणः अस्ति । बहुभ्यः वर्षेभ्यः एते व्यापारिणः सम्पूर्णे देशे वस्त्रनिर्मातृभिः सह सम्पर्कं कृतवन्तः, तेभ्यः ते वस्त्र-सम्बन्धे आदेशान् प्राप्नुवन्ति । ते अन्येभ्यः जनेभ्यः सूतं क्रीणन्ति ।*

*२. तन्तुवायाः समीपस्थेषु ग्रामेषु निवसन्ति । ते एतेभ्यः व्यापारिभ्यः सूतम् आनयन्ति।वयन-चक्रस्य अपि व्यवस्था तैः स्वस्य गृहस्य समीपे एव कृता अस्ति । एतस्मिन् चित्रे भवन्तः कस्मिंश्चित् एतादृशे गृहे स्थापितं पावरलूम इति यन्त्रं द्रष्टुं शक्नुवन्ति। तन्तुवायाः स्वस्य परिवारस्य सदस्यैः सह एतेषु हस्त-वयन-चक्रेषु बहुहोराः यावत् कार्यं कुर्वन्ति। वयनस्य अधिकतरेषु एतादृशेषु घट्टेषु द्विसङ्ख्यायाः आरभ्य अष्टौ सङ्ख्यां यावत् हस्त-वयन-चक्राणि भवन्ति येषां माध्यमेन सूततः वस्त्र-वयनं कृत्वा वस्त्रं सज्जीक्रियते । विभिन्नाः शाटिकाः, प्रोञ्छवस्त्राणि, युतकानि, महिलानां वेशाः तथा च प्रच्छर्दनपट्टाः एतैः निर्मीयन्ते ।*

*३. तन्तुवायाः सज्जीकृतं वस्त्रं नगरस्य व्यापारिणः समीपे नयन्ति । एतस्मिन् चित्रे तन्तुवायाः नगरस्य व्यापारिणः पार्श्वे गन्तुं सज्जीभूय उपविष्टाः सन्ति । व्यापारी इदं विवरणं स्वस्य पार्श्वे स्थापयति यत् तेभ्यः तन्तुवायेभ्यः कियत् कार्पासं दत्तम् आसीत् तथा च वयितस्य वस्त्रस्य कृते तेषां पारिश्रमिकं तेभ्यः यच्छति।*

### *दादन-व्यवस्था- तन्तुवायैः स्वगृहेषु वस्त्रस्य सज्जीकरणम्*

वस्त्रोपलब्धेः ये आदेशाः प्राप्यन्ते तेषाम् आधारेण व्यापारिणः तन्तुवायानां मध्ये कार्यस्य विभाजनं कुर्वन्ति। तन्तुवायाः व्यापारिणः सूतं स्वीकुर्वन्ति तथा च सज्जीकृतं वस्त्रं तस्मै यच्छन्ति। एतया व्यवस्थया तन्तुवायाः लाभद्वयं प्राप्नुवन्ति । तन्तुवायैः सूतं क्रेतुं स्वधनस्य नियोजनं न करणीयं भवति। सह एव सज्जीकृतानि यानि वस्त्राणि भवन्ति तेषां विक्रयणस्य व्यवस्था अपि भवति । तन्तुवायाः आदौ एव जानन्ति यत् तैः कीदृशं वस्त्रं निर्मापयितव्यम् अस्ति तथा च कियत्या मात्रया निर्मापयितव्यम् अस्ति ।

*इरोडस्य वस्त्रविपण्यां निम्नलिखिताः जनाः किं कार्यं कुर्वन्ति-व्यापारिणः तन्तुवायाः निर्यातकाः च?*

*तन्तुवायाः व्यापारिणां कथम् आश्रिताः सन्ति?*

*यदि तन्तुवायाः स्वयं कार्पासं क्रीत्वा निर्मितवस्त्राणि विक्रीणन्ति तर्हि ते त्रिगुणितम् अर्जनं कुर्वन्ति । किम् एतत् भवितुं शक्नोति? चर्चां कुर्वन्ति ।*

*किं एतादृशी एव दादन-व्यवस्था पर्पटनिर्माणे उपस्कर-कार्ये धूमदण्डिका-निर्माणे च अपि दृश्यते? स्वक्षेत्रतः एतस्मिन् विषये सूचनाः एकत्रीकुर्वन्तु तथा च कक्षायां तस्मिन् विषये चर्चां कुर्वन्तु।*

*भवद्भिः स्वक्षेत्रे सहकारिसंस्थानां विषये श्रुतं स्यात् यथा दुग्धस्य किराना इत्यस्य धान्यादिकस्य च व्यवसाये। जानन्तु यत् एताः संस्थाः केषां लाभार्थं स्थापिताः आसन्?*

असज्जीकृतां सामग्रीं प्राप्तुं तथा च सज्जीकृतायाः सामग्र्याः विक्रयणार्थम् अपि व्यापारिणाम् आश्रयणस्य कारणतः व्यापारिणां वर्चस्वम् अधिकं जायते। ते आदेशं यच्छन्ति यत् किं वस्त्रं निर्मातव्यम् अस्ति तथा च एतस्य कृते ते अतिन्यून-मूल्यं यच्छन्ति। तन्तुवायानां समीपे इदं ज्ञातुं किमपि साधनं नास्ति यत् ते केषां कृते वस्त्रस्य निर्माणं कुर्वन्तः सन्ति तथा च तेषां विक्रयणं कियता मूल्येन भविष्यति। विपण्यां व्यापारिणः इदं वस्त्रं धारणीय-वस्त्रोद्योगाय विक्रीणन्ति । अनेन प्रकारेण विपण्याः लाभः व्यापारिभ्यः एव आधिक्येन भवति।

तन्तुवायाः स्व-सम्पूर्णां सङ्गृहीतराशिं नियोज्य अथवा उच्चव्याजमात्रया ऋणं स्वीकृत्य वयनयन्त्रं क्रीणन्ति । एकस्य वयनयन्त्रस्य मूल्यं 20000 रूप्यकाणि सन्ति । अतः लघुतन्तुवायेन अपि द्वयोः वयनयन्त्रयोः कृते प्रायेण 40000 रूप्यकाणि व्ययीकरणीयानि भवन्ति। एतेषु वयन-यन्त्रेषु एकाकी कश्चित् कार्यं न कर्तुं शक्नोति। वस्त्रनिर्माणाय तन्तुवायेन सपरिवारं द्वादशहोराः यावत् कार्यं करणीयं भवति । एतेन सम्पूर्णेन उद्योगेन ते मासे प्रायः 3500 रूप्यकाणि एव अर्जयितुं पारयन्ति।

व्यापारि-तन्तुवाययोः मध्ये इयं व्यवस्था दादनव्यवस्था इत्यस्य किञ्चित् उदाहरणम् अस्ति यत्र व्यापारी स्थूलसामग्रीं ददाति तथा च तन्तुवायः तेन सिद्धः उत्पादः प्राप्यते। भारतस्य अनेकेषु क्षेत्रेषु वस्त्र-वयन-उद्योगे इयं व्यवस्था प्रचलिता अस्ति।



## तन्तुवाय-सहकारि-संस्था

***अस्माभिः दृष्टं यत् दादन-व्यवस्थायां व्यापारिणः तन्तुवायेभ्यः अत्यल्पं धनं यच्छन्ति।व्यापारिषु तन्तुवायानां या आश्रयता वर्तते तां न्यूनीकर्तुं तथा च तेषां आयं वर्धितुं सहकारिव्यवस्था एकं साधनम् अस्ति। कस्याञ्चित् सहकारि-संस्थायां ते जनाः येषां हितानि समानरूपेण सन्ति एकत्रीभूय परस्परं लाभार्थं कार्यं कुर्वन्ति। तन्तुवायानां सहकारि-संस्थायां तन्तुवायाः समूहं निर्माय काञ्चन् गतिविधीन् सामूहिकरूपेण कुर्वन्ति। ते कार्पास-व्यापारितः कार्पासं प्राप्नुवन्ति तथा च तत् कार्पासं तन्तुवायेषु वण्टयन्ति। सहकारिसंस्था विक्रयणस्य अपि कार्यं करोति। अनेन प्रकारेण व्यापारिणः मध्यस्थता समाप्तिं गच्छति तथा च तन्तुवायाः वस्त्रस्य उचितं मूल्यं प्राप्नुवन्ति। कदाचित् सर्वकारः उचितमूल्येन सहकारि-संस्थाभ्यः वस्त्रं क्रीत्वा तेषां साहाय्यं करोति। यथा तमिलनाडुराज्ये सर्वकारः निःशुक्लरूपेण गणवेश-दानस्य योजनां चालयति। सर्वकारः एतस्य कृते पावरलूम इत्यस्य तन्तुवायानां संस्थातः वस्त्रं स्वीकरोति। अनेन एव प्रकारेण हस्त-वयन-यन्त्र–तन्तुवाय-सहकारि-समितेः अपि वस्त्रं क्रीत्वा "को-ओपटेक्स-नामधेयस्य आपणानां माध्यमेन विक्रीणाति। भवद्भिः स्वनगरे प्रायेण कुत्रचित् एतादृशाः आपणाः दृष्टाः स्युः।***



*कस्मिंश्चित् वस्त्रोद्योगे महिला-श्रमिकाः कुड्मलं सीव्यन्ति।*

## *देहल्याः समीपे वस्त्रनिर्यातस्य उद्योगः*

इरोडस्य व्यापारी तन्तुवायैः निर्मितवस्त्रं देहल्याः समीपे निर्मितवस्त्र-निर्यात-कर्त्रे उद्योगाय प्रेषयति । वस्त्रनिर्यातक-उद्योगः एतस्य उपयोगः युतकनिर्माणाय करोति। एतानि युतकानि विदेशि-क्रेतृभ्यः निर्यातं क्रियन्ते। युतकानां वैदेशिकेषु ग्राहकेषु अमेरिकायाः यूरोपस्य च एतादृशाः व्यापारिणः अपि सन्ति ये भाण्डाराणां शृङ्खलां चालयन्ति । एते महान्तः भाण्डारस्वामिनः स्वप्रतिभूतेः आधारितं व्यापारम् एव कुर्वन्ति । ते सामग्री-दातृभ्यः न्यूनतम-मूल्ये सामग्रीक्रयणस्य याचनां कुर्वन्ति। सह एव ते वस्तूनाम् उच्चस्तरीयाः गुणवत्तायाः उपरि अपि च उचिते काले वस्तुदानस्य प्रतिभूतिम् अपि कुर्वन्ति । यदि वस्तूनि किञ्चिद् अपि दोषपूर्णानि सन्ति तर्हि एतस्याम् अवस्थायाम् अथवा वस्तुदाने स्वल्पे अपि विलम्बे सति दृढतया ते दण्डनिर्धारणं कुर्वन्ति। अतः निर्यातकाः एतैः शक्तिशालिभिः ग्राहकैः निर्धारितानां प्रतिभूतीनां पालनस्य सम्पूर्णतया प्रयासं कुर्वन्ति।

ग्राहकाणां पक्षतः एतादृशानां वर्धितप्रभावानां कारणतः वस्त्रनिर्यातक-उद्योगाः व्यये न्यूनतां कर्तुं प्रयत्नं कुर्वन्ति । ते कार्यकर्तृणां कृते यथाशक्यं न्यूतमं पारिश्रमिकं दत्त्वा अधिकतमं कार्यं कारयन्ति। अनेन प्रकारेण ते स्वस्य लाभांशं तु वर्धयन्ति अपि च वैदेशिकेभ्यः ग्राहकेभ्यः अपि न्यूनमूल्येन वस्त्राणि यच्छन्ति।

*वैदेशिकाः ग्राहकाः वस्त्रनिर्यातकेभ्यः किदृशीम् अपेक्षां कुर्वन्ति? वस्त्रनिर्यातकाः एताः प्रतिभूतीः किमर्थं स्वीकुर्वन्ति?*

*वस्त्रनिर्यातकाः वैदेशिकानां ग्राहकाणां प्रतिभूतिं कथं पूरयन्ति?*

*इम्पेक्ट-गार्मेंट-उद्योगे व्यापक-सङ्ख्यायां महिला-श्रमिकाः कार्ये किमर्थं स्थापिताः सन्ति? चर्चां कुर्वन्तु।*

*मन्त्रिमहोदयं सम्बोधयन् एकं पत्रं लिखन्तु, तस्मिन् पत्रे भवतां विचारेण श्रमिकाणां कृते यः उचितः राशिः देयः अस्ति तस्य याचनां कुर्वन्तु।*

*अधः प्रदत्ते युतकस्य चित्रे दर्शितम् अस्ति यत् व्यापारिणः कृते कियान् लाभांशः अभवत् तथा च तेन कियान् व्ययः कृतः। यदि युतकस्य निर्माणस्य मूल्यं 600 रूप्यकाणि सन्ति तर्हि एतेन चित्रेण जानन्तु यत् एतस्य युतकस्य मूल्ये किं किं सम्मिलितं भवति?*

इम्पेक्टगारमेंट् इति वस्त्रोद्योगे **70** कर्मकराः सन्ति। तेषु अधिकतराः महिलाः सन्ति। एतासु अधिकतराः श्रमिकाः अस्थायिरूपेण नियुक्ताः सन्ति। एतस्य अभिप्रायः अयम् अस्ति यत् यदा उद्योगस्य स्वामी अनुभूयेत यत् अधुना श्रमिकाणाम् आवश्यकता नास्ति तस्मिन् समये सः ताः वृत्तितः मुक्तिं दातुं शक्नोति। शिल्पकाराणां पारिश्रमिकः तेषां कौशलस्य आधारेण निर्धार्यते। कर्मकरेषु अधिकतमं वेतनं सौचिकः प्राप्नोति यत् प्रायः **3000** रूप्यकाणि प्रतिमासं भवति। स्त्रियः सहायिकायाः रूपेण कार्ये नियोज्यन्ते तासां कार्यं भवति यथा सूत्रकर्तनं कुड्मलयोजनं समीकरणम् अपि च पुटकनिर्माणम्। एतेषां कार्याणां कृते न्यूनतमः पारिश्रमिकः दीयते।

| | |
|---|---|
| श्रमिकाणां कृते तेषां पारिश्रमिकस्य दानम् | |
| सौचिकः | **3000** रूप्यकाणि |
| प्रतिसप्ताहम् समीकरणम्(प्रेस इति) | **1.50** प्रतिवस्त्रम् |
| निरीक्षणम् | **2000**रूप्यकाणि प्रतिमासम् |
| सूत्रकर्तनम् कुड्मलयोजनं च | **1500** रूप्यकाणि प्रतिमासम् |

## *संयुक्तराज्य-अमेरिकायां तद् युतकम्*

***संयुक्तराज्य-अमेरिकायाः वस्त्राणां कस्मिंश्चित् वृहति आपणे बहूनि युतकानि प्रदर्शितानि सन्ति। एतेषां मूल्यं** 26 **डालर इति निर्धारितम् अस्ति अर्थात् प्रत्येकं युतकं** 20 **डालर अर्थात्** 1200 **रूप्यकेषु विक्रेष्यते।***

**प्रदत्तस्य चित्रस्य अनुसारं रिक्तस्थानानां पूर्तिं कुर्वन्तु-**

युतकानां व्यापारिणा देहल्याः वस्त्र-निर्यातकात् युतकानि .......... रूप्यकाणि प्रतियुतकं इति मूल्येन क्रीतानि। पुनः तेन तानि युतकानि ........ रूप्यकाणि सञ्चारमाध्यमैः विज्ञापनस्य कृते व्ययीकृतानि तदनन्तरं प्रायः प्रतियुतकं .......रूप्यकाणि भाण्डारे रक्षयितुं तथा च प्रदर्शनार्थम् अन्यकार्यार्थं च व्ययीकृतानि। अनेन प्रकारेण एषः जनः **600** रूप्यकाणि इति एकस्य युतकस्य कृते व्ययीकृतवान् अपरञ्च सः तत् युतकं **1200** रूप्यकेषु विक्रीणाति। एकेन युतकेन सः ....लाभांशं प्राप्तवान्। सः यावत्यां सङ्ख्यायां युतकानि विक्रेष्यति सः तावन्तम् अधिकं लाभांशं प्राप्स्यति।



वस्त्रनिर्यातकेन **200** रूप्यकाणि प्रतियुतकं मूल्येन युतकानि विक्रीतानि । वस्त्रार्थं युतके प्रयुक्तायाः अन्यसामग्र्याः कृते व्ययधनं **70** रूप्यकाणि प्रतियुतकम् इति अनेन प्रकारेण व्ययः अभवत् । कर्मकराणां पारिश्रमिकः **15** रूप्यकाणि प्रतियुतकं व्ययः अभवत् तथा च कार्यालय-सञ्चालनस्य कृते अपि **15** रूप्यकाणि प्रतियुतकं व्ययः अभवत् । किं भवन्तः वक्तुं शक्नुवन्ति यत् वस्त्रनिर्यातकः प्रतियुतकं कियन्तं लाभांशं प्राप्तवान्?

विपण्यां लाभस्य अर्जयितारः के सन्ति ?

विपण्याः एका शृङ्खला कार्पासस्य उत्पादकं सुपरमार्किट-इत्यस्य ग्राहकेण योजयति । एतस्याः शृङ्खलायाः प्रत्येकं घट्टे क्रयणं विक्रयणं च भवति । आगच्छन्तु पुनः स्मरामः यत् ते के के जनाः आसन् ये क्रयणस्य विक्रयणस्य च एतस्यां प्रक्रियायां सम्मिलिताः आसन् । किं ते सर्वे समानरूपेण लाभं प्राप्तवन्तः अथवा लाभस्य मात्रा विभिन्नेभ्यः जनेभ्यः विभिन्ना आसीत् ? कैश्चित् जनैः विपण्यां लाभः अर्जितः अपरञ्च केचन क्रयणेन विक्रयेण च विशिष्टं लाभं न प्राप्तुं शक्तवन्तः । बहुपरिश्रमं कृत्वा अपि ते अत्यल्पम् अर्जितवन्तः । किं भवन्तः एतस्यां तालिकायां तान् दर्शयितुं शक्नुवन्ति ?

### *विपणिः समानता च*

वैदेशिकेन व्यापारिणा विपण्याम् अधिकः लाभांशः अर्जितः । तस्य तुलनायां वस्त्रनिर्यातकस्य लाभांशः मध्यमश्रेण्याः आसीत् । अपरस्मिन् पक्षे वस्त्रनिर्यातक-उद्योगस्य कर्मकराः काठिन्येन केवलं स्व-दैनन्दिनीः आवश्यकताः पूरयितुम् एव अर्जितवन्तः । अनेन प्रकारेण अस्माभिः दृष्टं यत् कार्पास-उत्पादिका लघुकृषिका तथा च इरोडस्य तन्तुवायाः कठिनं श्रमं कृतवन्तः परन्तु विपण्यां, ते तेषाम् उत्पादानाम् उचितं मूल्यं न प्राप्तवन्तः। व्यवसायिनां व्यापारिणां च स्थितिः मध्यमभूता अस्ति । तन्तुवायैः सह तुलनायां तेषाम् अर्जनम् अधिकम् अस्ति परन्तु निर्यातकस्य लाभतः अत्यल्पम् अस्ति । अनेन प्रकारेण विपण्यां सर्वे समानरूपेण न अर्जयन्ति । प्रजातन्त्रस्य अन्तर्गतं सर्वैः विपण्याम् उचितः परिश्रमिकः प्राप्तव्यः अस्ति पुनः सा कान्ता वा स्यात् अथवा स्वप्ना वा स्यात् । यदि परिवाराः पर्याप्तरूपेण न अर्जयिष्यन्ति तर्हि ते आत्मानं अन्येषां समं कथम् अनुभविष्यन्ति ?

*गार्मेंट-उद्योगस्य श्रमिकाः गार्मेंट इत्यस्य निर्यातकाः विदेशिविपण्याः व्यवसायी च प्रत्येकं युतकेन कियन्तं लाभांशं प्राप्तवन्तः? परस्परम् एतेषां तुलनां कृत्वा जानन्तु।*

*व्यवसायी विपण्याम् उच्चतरं लाभांशम् अर्जयति। एतस्य किं कारणम् अस्ति?*

*भवद्भिः विज्ञापनेन सम्बन्धितः अध्यायः पठितः। चर्चां कुर्वन्तु यत् व्यवसायी प्रत्येकं युतके विज्ञापनस्य कृते ३०० रूप्यकाणि किमर्थं व्ययीकरोति?*

| *विपण्याम् अधिकलाभस्य अर्जकाः जनाः* |
| --- |
| 1. ______ |
| 2. ______ |
| 3. ______ |

| *विपण्यां न्यूनलाभस्य अर्जकाः जनाः* |
| --- |
| 1. ______ |
| 2. ______ |
| 3. ______ |



किं भवन्तः एतद् जानन्ति स्म यत् भवन्तः यद् पूर्वनिर्मितवस्त्राणि क्रीणन्ति तस्य तत् स्वरूपं प्रापयितुम् प्रत्यक्ष-अप्रत्यक्षरूपेण कियतां जनानां प्रयासः भवति ?

एकस्मिन् पक्षे विपणिः जनानां कृते कार्यं कर्तुं वस्तूनि निर्मातुं विक्रेतुं च अवसरं प्रददाति अत्र केचन जनाः उत्पादयन्ति केचन जनाः च निर्मान्ति । कृषकः अत्र कार्पासं विक्रेतुं शक्नोति तथा च तन्तुवायः स्वनिर्मितवस्त्रं विक्रेतुं शक्नोति । अपरस्मिन् पक्षे विपणितः धनाढ्याः शक्तिशालिनः च जनाः एव प्रायः सर्वाधिकम् अर्जनं कर्तुं शक्नुवन्ति । एते ते जनाः भवन्ति येषां पार्श्वे धनम् अस्ति स्व-उद्योगस्थानकानि सन्ति महान्तः आपणाः सन्ति तथा च बहुभूखण्डाः सन्ति । निर्धनाः तेषां धनिकानां शक्तिशालिनां च जनानाम् आश्रिताः भवन्ति । निर्धनाः अनेकेषां वस्तूनां कृते ऋणार्थम्, असिद्धां सामग्रीं च प्राप्तुं, स्ववस्तूनि विक्रेतुं, वृत्तिं प्राप्तुं च आश्रिताः भवितुं बाध्याः भवन्ति । अस्य आश्रयस्य कारणतः विपण्यां निर्धनानां शोषणं भवति । एतासां समस्यानां समाधानार्थम् अपि मार्गाः उपायाः वा सन्ति यथा उत्पादकाः मिलित्वा सहकारिसंस्थानां निर्माणं कुर्युः तथा च अधिनियमानां दृढतया पालनं भवेत् । अन्तिमे अध्याये वयं पठिष्यामः यत् तवा-नद्याः समीपे धीवरैः कथं कस्याश्चित् सहकारिसंस्थायाः प्रारम्भः कृतः।

# अभ्यासः

1. स्वप्ना स्वस्य कार्पासं कुर्नूलस्य कार्पास-विपण्यां न विक्रीय, व्यापारिणे किमर्थं विक्रीतवती?
2. वस्त्र-निर्यातकानाम् उद्योगस्य श्रमिकाणां कार्यस्य च स्थितेः विषये तथा च तेषां कृते दीयमानस्य पारिश्रमिकस्य च वर्णनं कुर्वन्तु । किं भवन्तः चिन्तयन्ति यत् श्रमिकैः सह न्यायः भवति?
3. एतादृशस्य कस्यचित् वस्तुनः विषये चिन्तयन्तु यस्य वयं सर्वे प्रयोगं कुर्मः। तद् वस्तु शर्करा चायं दुग्धं लेखनी कर्गदम् अङ्कनी इत्यादिकं किमपि स्यात्। चर्चां कुर्वन्तु यत् इदं वस्तु विपणेः कया शृङ्खलया सम्बद्धतां स्थापयत् भवत्पर्यन्तं प्राप्नोति । किं भवन्तः तेषां सर्वेषां जनानां विषये चिन्तयितुं शक्नुवन्ति यैः एतस्य वस्तुनः उत्पादने व्यापारे च साहाय्यं कृतं स्यात्?
4. अत्र प्रदत्तानि नव कथनानि उचितेन क्रमेण कुर्वन्तु तथा च पुनः अधः निर्मितानां कार्पासस्य बीजानां चित्रेषु सम्यक् कथनस्य अङ्कान् पूरयन्तु । प्रथमयोः द्वयोः चित्रयोः भवतां कृते अङ्काः पूर्वम् एव पूरिताः सन्ति।

1. स्वप्ना व्यापारिणे कार्पासं विक्रीणाति।
2. ग्राहकाः विशिष्टविपण्यां एतानि युतकानि क्रीणन्ति।
3. व्यापारिणः जिनिंगवस्त्र-उद्योगान् कार्पासं विक्रीणन्ति।
4. गार्मेंट-निर्यातकाः युतकनिर्माणार्थं व्यापारिभ्यः वस्त्रं क्रीणन्ति।
5. कार्पासस्य व्यापारिणः तन्तुवायेभ्यः कार्पासं यच्छन्ति।
6. वस्त्रनिर्यातकः संयुक्तराज्य-अमेरिकायाः व्यापारिणे युतकानि विक्रीणाति।
7. सूतनिर्माणस्य उद्योगाः कार्पासं क्रीणन्ति तथा च सूतस्य व्यापारिणे सूतं विक्रीणन्ति।
8. तन्तुवायाः वस्त्रं सज्जीकृत्य आनयन्ति।
9. जिनिंग-उद्योगाः कार्पासं स्वच्छीकुर्वन्ति तथा च तेषां चयं निर्मान्ति ।




*शब्द-सङ्कलनम्*

*जिनिंग-उद्योगः – इति सः उद्योगः भवति यत्र कार्पासस्य बीजानि तस्य गोलकतः पृथक्क्रियन्ते। अत्र कार्पासं नोदयित्वा चयाः अपि क्रियन्ते ये सूत्रनिर्माणार्थं प्रेष्यन्ते।*

*निर्यातकः - एषः सः जनः भवति यः विदेशान् प्रति वस्तूनि प्रेषयति।*

*लाभांशः – अर्थात् यः आयः जातः अस्ति ततः सम्पूर्णं व्ययं पृथक् कृत्वा ऋणं कृत्वा वा अवशिष्टः राशिः। यदि व्ययः आयतः अधिकाः भवेत् तर्हि हानिः भवति।*